संवत्सरं वा प्राप्य पितृत्वप्रापकं इति न सपिण्डनान्तरम् । अत्र श्वः कर्त्तास्मीति निश्चित्य दाता विप्रान्निमन्त्रयेत् । इतिवन्निश्चित्येति उत्कटकोटिकसम्भावनोपलक्षणम् । भविष्यन्निमित्तस्य कर्म्मणः प्रत्यूहार्हत्वात् । एवञ्च वृद्धिश्राद्धं यदर्थं कृतं तत्कर्म्म चेत् विघ्नात्तद्दिने न क्रियते तदा दिनान्तरे तत्कर्म्मणि क्रियमाने तदङ्गत्वात् पुनर्वृद्धिश्राद्धं कर्त्तव्यमेव ।

"प्रधानस्याक्रिया यत्र साङ्गं तत् क्रियते पुनः ।
तदङ्गस्याक्रियायान्तु नावृत्तिर्न च तत् क्रिया ॥"

इति छन्दोगपरिशिष्टेन साङ्गकरणाभिधानात् हेमाद्रिधृतम् ।

पूर्णे संवत्सरे श्राद्धं षोड़शं परिकीर्त्तितम् ।
तेनैव च सपिण्डत्वं तेनैवाब्दिकमिष्यते ॥"

अत्र पूर्णसंवत्सरक्रियमाणश्राद्धादयथोभयनिर्व्वाहः । तथापकृष्टसपिण्डनादप्युभयनिर्व्वाहात्र पूर्णसंवत्सरे आब्दिकान्तरं कार्य्यम् । एवञ्च पञ्चदशश्राद्धे कृतेऽप्युन्नेयम् ॥*॥ उदकपात्राणि इति अर्घ्यार्थमुदकयुक्तपात्राणि । अत्र त्रीणि पितॄणामेकं प्रेतस्येति पाठक्रमदर्शनात् सर्व्वत्र छन्दोगानां यजुर्व्वेदिनाञ्च गृह्यानुरोधात् सपिण्डीकरणे प्रेतकर्म्मकरणं पितृकर्म्मपूर्व्वकम् । तयोः पार्व्वणवत् पूर्व्वमेकोद्दिष्टमथापरम् । इति पूर्व्वलिखितवचने शाब्दक्रमदर्शनात् । देवकृत्यपितृकृत्ययोर्म्मध्ये प्रेतकृत्येन व्यवधानस्यायुक्तत्वाच्च । एतेन अथ सपिण्डीकरणं संवत्सरमेकं पिण्डमुद्दिश्य संवत्सरान्ते चत्वार्य्युदकपात्राणि प्रयुनक्ति तत्रैकं प्रेतस्य त्रीणि इतरेभ्यः । इत्याश्वलायनदर्शनात् सर्व्वशाखिनां सपिण्डीकरणे प्रेतादित्वं मैथिलोक्तं निरस्तम् । एतद्वचनस्य तच्छाखिमात्रपरत्वात् । किन्त्वर्घ्यदानमात्रे पाठक्रमाच्छाब्दक्रमस्य बलवत्त्वात् ब्रह्मपुराणे प्रेतार्घ्यदानान्तरं ततः पितामहादिभ्यः इति शब्दक्रमस्याबाधायार्घ्यपात्रेषु गन्धपुष्पदानपर्य्यन्तं पितृपूर्व्वकता उत्सर्गे तु प्रेतपूर्व्वकतेति । तथा ब्रह्मपुराणम् ।

"चतुर्भ्य स्वार्घ्यपात्रेभ्य एकं वामेन पाणिना ।
गृहीत्वा दक्षिणेनैव पाणिना च तिलोदकम् ॥
सम्मार्ज्जयित्वा पृथिवीं ये समाना इति स्मरन् ।
प्रेतविप्रस्य हस्ते तु चतुर्भागं जलं क्षिपेत् ॥
ततः पितामहादिभ्यस्तन्मन्त्रैश्च पृथक् पृथक् ।
ये समाना इति द्वाभ्यां तज्जलन्तु समर्पयेत् ॥
अर्घ्यं तेनैव विधिना प्रेतपात्राच्च पूर्व्ववत् ।
तेभ्यश्चार्घ्यं निवेद्यैव पश्चाच्च स्वयमाचमेत् ॥"

एकं प्रेतपात्रं वामेन अनन्तरं दक्षिणेन गृहीत्वा इति सम्बन्धः । ये समाना इति मन्त्रद्वयं पठन् प्रेतपात्रस्थं उत्सृष्टजलं कुशरेखात्रयेण चतुर्धा विभज्य भागमेकं प्रेतब्राह्मणहस्ते क्षिपेत् दद्यात् । उत्सृष्टजलपिण्डयोर्व्विभागे मन्त्रस्य करणत्वं व्यक्तमाह शातातपः ।

"निकृष्य चतुरः पिण्डान् पिण्डदः प्रतिनामतः ।
ये समाना इति द्वाभ्यामाद्यन्तु विभजेत् त्रिधा ॥
एष एव विधिः पूर्व्वमर्घ्यपात्रचतुष्टये ॥"

ततस्तदनन्तरं तन्मन्त्रैः पितामहादिभेदेन त्रिरावृत्तैर्या दिव्या इति मन्त्रैश्चकारात् पितामहाद्युत्सर्गवाक्यैरर्घ्यमुत्सृज्य ये समाना इति द्वाभ्यां मन्त्राभ्यामर्घ्यं पुष्पोदकं तज्जलं प्रेतपात्रस्थजलं तेनैव विधिना प्रत्येकेन पूर्व्ववत् चतुर्भागरूपं प्रेतपात्रात् समर्पयेत् । तेभ्यः पितामहादिभ्यस्त्रिभ्यस्तन्मिश्रितपुष्पतिलोदकरूपमर्घ्यं निवेद्य तत्तद्ब्राह्मणहस्ते प्रक्षिप्य पश्चादाचमेदित्यर्थः । तेन प्रेतब्राह्मणहस्ते उत्सृज्य दत्तस्यैवार्घ्यजलस्य तदवशिष्टजलस्य भागत्रयं पितामहाद्युत्सृष्टार्घ्यजलेषु मिश्रीकर्त्तव्यमिति प्रतीयते । अतएव दत्तस्यैव प्रेतपिण्डस्य मिश्रीभाव इति श्राद्धविवेकः ॥*॥ यच्च न चात्र दैवं भोजयेत् प्रागेव दैवे अर्घ्यं मन्त्राद्यञ्च दत्त्वा गन्धमाल्यैः पात्रमर्च्चयित्वा हुतशेषं पितृभ्यः पात्रेषु दद्यात् इत्याश्वलायनवचने पितृपात्रे दैवं न मिश्रयेदिति कल्पतरुव्याख्यानुरोधेन मैथिलोक्तं सर्व्वशाखिनान्तथाचरणम् । तन्नयुक्तम् । आश्वलायनेन काण्डानुशयस्योक्तत्वात् बह्वृचानामेव तथा युक्तत्वात् । न सामगयजुर्व्वेदिनोः । तयोः पदार्थानुशयस्योक्तत्वात् । अत्र सामयजुर्व्वेदिनोः श्राद्धसूत्रे समन्वये मन्त्रदर्शनात्तत्रैव मन्त्रान्वयः पितृदयितादावुक्तः । वस्तुतस्तु पौराणिकत्वात् देवताभ्य इत्यस्य पाठवत् साधारणस्मृतिकारशातातपोक्तत्वाच्च विभागेऽपि मन्त्रान्वयो युक्तः अतएव मैथिलैरपि तथा लिखितमिति ॥*॥ एवञ्च पार्व्वणे प्रागुक्तवचनेन शेषद्रव्येण पिण्डदानविधानात् तद्विकृतावपि सपिण्डीकरणे तन्नियमात् यद्यपि शेषाभावे पिण्डनिवृत्तिरायाति तथापि ।

"यथोक्तवस्त्वसंप्राप्तौ ग्राह्यं तदनुकारि यत् ।
यवानामिव गोधूमा व्रीहीणामिव शालयः ॥"

इति छन्दोगपरिशिष्टवचनात् मुख्याभावे प्रतिनिधिः शास्त्रार्थं इति न्यायाच्च मध्वाद्यभावे गुड़ादिग्रहणवत् द्रव्यान्तरेणापि पिण्डदानम् शेषद्रव्यनियमस्तु तत्सम्भवे द्रव्यान्तरत्यागाय । अन्यथा तदङ्गाभावे कर्म्मवैगुण्यं स्यात् । सहपिण्डक्रियायां इति मनूक्तेः प्रेतपिण्डस्य सहमिश्रीकरणं यत्रेति सपिण्डीकरणसमाख्यासिद्ध्यर्थं सुतरां तत्र तथाचरणम् । प्रतिपत्तिरूपकर्म्माङ्ग एव प्रतिपाद्याभावे तन्निवृत्तिः । पशुयागे लोहितं निरस्यति सकृन्निरस्यति इत्यादावुक्ता । अतएव यज्ञवास्तुरूपप्रतिपत्तियागेऽपि यज्ञो यत्र वसति इति यज्ञवास्तुसमाख्यानुरोधेनास्तृतकुशविनाशेऽपि कुशान्तरप्रतिनिधिर्भट्टनारायणैः गोभिलभाष्ये उक्तः । प्राक् स्विष्टिकृत आवापः इति गोभिलसूत्रस्य व्याख्यानेऽपि आ उच्यते इत्यावापः प्रधानहोमः स तु स्विष्टिकृद्धोमात् प्राक् न पश्चादित्यर्थः । एवञ्च मुख्यहोमे त्यक्ते यदि चरुर्नष्टो दुष्टो वा भवति तदान्यः पाच्यः मुख्ये कृते चेन्नाशदुष्टी स्यातां तदाज्येनैव स्विष्टिकृद्धोम इति शरला । एतेन शेषनाशे पिण्डनिवृत्तिरिति वाचस्पतिमिश्रोक्तं हेयम् ॥*॥ एतेन पिण्ड इति । एतेनार्घ्यदानविधानेन । पिण्डः पिण्डमिश्रणप्रकारो व्याख्यातः । तथा च ब्रह्मपुराणम् ।

"अथ तेनैव विधिना दर्भमूलेऽवनेजनम् ।
पितुर्दत्त्वा तु पिण्डन्तु दद्याद्भक्त्या तु पूर्व्ववत् ॥
दत्त्वापिण्डान् पितृभ्यस्तु पश्चात् प्रेताय पार्श्वतः ।
तन्तु पिण्डं त्रिधा कृत्वा आनुपूर्व्व्या च सन्ततम् ॥
निदध्यात्त्रिषु पिण्डेषु एवं संसर्ज्जने विधिः ॥"

पितृभ्यः पितृपितामहादिभ्यः पिण्डान् दत्त्वा पश्चात् प्रेताय पार्श्वतः पूर्व्वदेशे पिण्डं दद्यादित्यर्थः । तं प्रेताय दत्तपिण्डम् । आनुपूर्व्व्या पितामहादिक्रमेण । संसर्ज्जने प्रेतपिण्डमिश्रणे । भविष्यपुराणम् ।

"गन्धोदकतिलैर्युक्तं कुर्य्यात् पात्रचतुष्टयम् ।
अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत् ॥"
ये समाना इति द्वाभ्यामेतज्ज्ञेयं सपिण्डनम् ।
नित्येन तुल्यं शेषं स्यादेकोद्दिष्टं स्त्रिया अपि ॥"

नित्येनावश्यकेन ततश्च पार्व्वणांशे पार्व्वणेन एकोद्दिष्टांशे एकोद्दिष्टेन शेषं अङ्गजातं तुल्यम् । एकोद्दिष्टमिति एकोद्दिष्टं तद्धर्म्मग्राहित्वात् सपिण्डीकरणञ्चेत्युभयपरम् । एतत् सपिण्डीकरणमेकोद्दिष्टं स्त्रिया अपि । इति याज्ञवल्क्यवचनैकवाक्यत्वात् । तेन श्राद्धेषु मध्ये एतच्छ्राद्धद्वयं स्त्रियाः कर्त्तव्यं न त्वाभ्युदयिकश्राद्धादि । अत्र वा कर्त्तरि कृत्ये इति कर्त्तरि षष्ठीति कर्त्तृत्वनियमः । वृद्धिश्राद्धादौ स्त्रीणां भोजनदर्शनान्न भोक्तृत्वनियमः ॥*॥ पितरि पूर्व्वमृते तद्वर्षाभ्यन्तरे पितामहे प्रपितामहे च मृते यथा कर्त्तव्यं तथाह छन्दोगपरिशिष्टे कात्यायनः ।

'पितुः सपिण्डतां कृत्वा कुर्य्यान्मासानुमासिकम् ।
असंस्कृतौ न संस्कार्य्यौ पूर्व्वौ पौत्त्रप्रपौत्त्रकैः ।
पितरं तत्र संस्कुर्य्यादिति कात्यायनोऽब्रवीत् ॥
पापिष्ठमपि शुद्धेन शुद्धं पापकृतापि वा ।
पितामहेन पितरं संस्कुर्य्यादिति निश्चयः ॥"

पितुः सपिण्डतां कृत्वा प्रेतीभूतयोरपि पितामहप्रपितामहयोः सतोः प्रतिमासविहितं पार्व्वणं पितृवृद्धप्रपितामहातिवृद्धप्रपितामहानां कर्त्तव्यं न तु तयोः सपिण्डीकरणापेक्षा कार्य्या ॥*॥ ननु सपिण्डनेनासंस्कृताभ्यां पितामहप्रपितामहाभ्यां सह पितुः कथं सपिण्डनाख्यसंस्कारस्तस्मात् तदर्थं तयोः सपिण्डीकरणमपकर्षणीयं पितुरेव वा सपिण्डनमुत्कर्षणीयमित्यत आह असंस्कृताविति । उत्कर्षापकर्षौ न कार्य्यावित्यनेन वचनेनोक्तम् । कथमसंस्कृतेन सह संस्कार इत्यत आह पापिष्ठमपीति । पापिष्ठमकृतसपिण्डीकरणं शुद्धेन कृतसपिण्डीकरणेन पितामहेन पापकृता वा